(शोधलेखनाम- वेदार्थ निर्णये व्याकरणस्य उपादेयता)

254

Registration No. V-36244/2008-09 ISSN :- 2350-0611

# Research Highlights

*A Multidisciplinary Quarterly International Referred Research Journal*

*Editor*

**Dr. Kamlesh Kumar Singh**
Assistant Professor
Gaya Prasad Smarak Govt. P.G. College
Azamgarh

Volume - IV No. - 3 (July – Sept. 2017)

*Published by*
Future Fact Society
Varanasi (U.P.) India

255

# CONTENTS

*"Research Highlights"*


| | | |
|---|---|---|
| ➲ | इमैनुअल काण्ट एवं जेरेमी बैन्थम के दण्ड संबंधी विचारों का अपराधशास्त्रीय अध्ययन<br>***डॉ0 सौम्या यादव*** | 01-09 |
| ➲ | प्राचीन भारत में पंचायतन पूजा<br>***अखिलेश कुमार*** | 05-11 |
| ➲ | रामकथा परम्परा और रामचरितमानस<br>***अंशुमान सिंह*** | 19-22 |
| ➲ | मानव संसाधन विकास : एक पर्यावरणीय परिदृश्य<br>***डॉ0 संजय कुमार राम*** | 23-25 |
| ➲ | व्याकरणशास्त्रे स्फोटतत्वविमर्श:<br>***तरुण कुमार*** | 26-31 |
| ➲ | विविधमतालोचनपुरस्सरवाक्यस्वरूपविमर्श:<br>***विक्रम अधिकारी*** | 32-35 |
| ➲ | **श्रीनागेशभट्टदिशा शक्तिस्वरूपसमीक्षणम्**<br>**अरविन्द कुमार पाण्डेय** | 36-44 |
| ➲ | बहुसांस्कृतिक एवं धार्मिक सौहार्द की पवित्र नगरी बनारस<br>***सुनील कुमार सोनकर*** | 45-48 |
| ➲ | पर्यावरण संरक्षण में वैगा जनजातीय का इतिहास<br>***पूनम मिश्रा*** | 49-50 |
| ➲ | वर्तमान परिदृश्य में ई–शिक्षा क्रान्ति की बढ़ती भूमिका<br>***धर्मेन्द्र कुमार सोनकर*** | 51-54 |
| ➲ | वर्तमान शैक्षिक समस्याओं के समाधान में वैदिक कालीन शैक्षिक परम्पराओं की प्रासंगिकता<br>***दीपक कुमार*** | 55-60 |
| ➲ | काशी निवास सम्बन्धी कवि सुब्रहण्य भारती का एक परिचय<br>***जयन्ती कृष्णन्*** | 61-65 |
| ➲ | तुलसीराम की आत्मकथा में सामाजिक जीवन का यथार्थ<br>***पूजा सिंह*** | 66-70 |
| ➲ | भारत विभाजन की त्रासदी और झूठासच<br>***संध्या यादव*** | 71-75 |
| ➲ | सोशल मीडिया में महिलाओं की बढ़ती जागरूकता<br>***अजीत कुमार*** | 76-79 |
| ➲ | आत्मज्ञान का हेतु विशुद्धचित्त योगवसिष्ठ के सन्दर्भ में<br>***डॉ0 दीपिका राय*** | 80-84 |
| ➲ | प्रशासन–प्रबन्धन में नारी (गुप्तोत्तर–हर्षकाल)<br>***डॉ0 सुनयना सिंह*** | 85-90 |

| | | |
|---|---|---|
| ➲ | 'अन्या से अनन्या'' प्रेम खोजती स्त्री की आत्मकथा<br>*अजय कुमार* | 91-94 |
| ➲ | भारतीय संस्कृति : परम्परागत मूल्यों एवं आधुनिक मूल्यों का समन्वय<br>*अमुक जी मित्तल* | 95-97 |
| ➲ | रामदरश मिश्र के उपन्यास 'पानी के प्राचीर' में नारी चेतना<br>*लवकेश कुमार* | 98-104 |
| ➲ | मनु द्वारा वर्णित भारतीय संस्कृति का संक्षिप्त अवलोकन<br>*माधुरी यादव* | 105-108 |
| ➲ | भूमण्डलीकरण के मुहाने पर काशी का अस्सी<br>*श्रीकान्त यादव* | 109-116 |
| ➲ | **चाँद का मुँह टेढ़ा है में मानवीय आस्था की तलाश**<br>**डॉ. जगमोहन सिंह** | 117-120 |
| ➲ | शरीर के जोड़ व खेलों में शारीरिक हलचलों की भूमिका<br>*अच्छे लाल यादव*<br>*डॉ0 महानन्द यादव* | 121-124 |
| ➲ | भारतीय प्रशासनिक व्यवस्था में राज्यपाल की स्थिति<br>*विजय कुमार* | 125-127 |
| ➲ | सातवाहन युगीन कला में प्रतिबिंबित नारी स्वरूप का विश्लेषणात्मक अध्ययन<br>*ओम प्रभा* | 128-134 |
| ➲ | त्रिशूल–मानवीय सद्भाव के क्षरण की त्रासदी और साम्प्रदायिकता<br>*आनन्द कुमार सिंह* | 135-138 |
| ➲ | सैन्धवकाल में कृषि एवं कृषि उपकरण<br>*कमल कृष्ण राय* | 139-140 |
| ➲ | मध्य गंगा घाटी में प्रारम्भिक लौह युगीन और आरम्भिक ऐतिहासिक युगीन कला<br>*डॉ. सुबास चन्द पाल* | 141-144 |
| ➲ | प्राचीन भारत में राज्य के उत्पत्ति का सिद्धान्त<br>*रक्षा सिंह* | 145-147 |
| ➲ | संगीत घरानों का वर्तमान परिदृश्य<br>*श्रेया श्रीवास्तव* | 148-150 |
| ➲ | नव्य व्याकरणस्य वैशिष्ट्यम्<br>*डॉ. अरविन्द कुमार शुक्ल* | 151-153 |
| ➲ | भुवनेश्वर की साहित्य दृष्टि<br>*डॉ. सत्यवीर* | 154-158 |
| ➲ | हिन्दु–मुस्लिम एकता के प्रतीक कबीर<br>*डॉ विनीता कुमारी* | 159-162 |
| ➲ | वेदार्थनिश्चये व्याकरणस्य उपादेयता<br>*डॉ0 आचार्यबृहस्पतिमिश्रः* | 163-168 |

# वेदार्थनिश्चये व्याकरणस्य उपादेयता

**डॉ0 आचार्यबृहस्पतिमिश्रः***

निखिलज्ञाननिधयो वेदाः। वेदाः ज्ञानराशयः।[1] वेदशब्दस्य प्रमुखार्थः ज्ञानम् एव। एते सकलधर्ममूलाः, कर्त्तव्याकर्त्तव्यबोधकाः, धर्मोपदेशकाः, सरससुबोधाः च। वेदाः मन्त्रराशिभूताः चतसृषु संहितासु सन्निविष्टाः। वेदानां मन्त्रराशित्वेन स्वरूपं द्विविधम्– शब्दमयम्, अर्थमयं च। शब्दमये स्वरूपे प्रमुखतः उच्चारणज्ञानार्थ शिक्षाशास्त्रस्य, छन्दोज्ञानार्थं छन्दःशास्त्रस्य च एतयोः द्वयोः वेदाङ्गयोः अनिवार्यता। अर्थमये स्वरूपे व्याकरणशास्त्रस्य निरुक्तशास्त्रस्य च एतयोः द्वयोः वेदाङ्गयोः आवश्यकता। यज्ञादिषु कर्मप्रसारदृष्ट्या कल्पशास्त्रस्य ज्योतिषशास्त्रस्य च एतयोः द्वयोः वेदाङ्गयोः उपादेयता। वेदाः ज्ञानस्वरूपाः मन्त्रराशिभूताः मन्त्रार्थज्ञानं विना भारभूताः निरर्थकाश्च भवन्ति। यथोक्तं निरुक्ते–

**स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम्।**
**योऽर्थज्ञ इत्सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा।।**[2]

अर्थात् यः वेदस्य शब्दराशिम् अधीत्य तस्य शब्दराशेः अर्थं न जानाति स जनः शब्दराशिरूपेण भारं वहन् भारवाही इव स्थाणुः अर्थात् जडः अस्ति। किन्तु यः अर्थमपि जानाति स ज्ञानेन अज्ञानान्धकारं दूरीकृत्य सम्पूर्णज्ञानलाभं सर्वविधमङ्गलं चातनोति। एवं बहुविधरूपेण शास्त्रज्ञैः वेदविद्भिः अर्थज्ञानस्य महत्ता वर्णिता।[3]

अत्र धार्मिकविचारधाराः, दार्शनिकविचारधाराश्च समाहितास्सन्ति। वस्तुतोऽयं वेदः आसृष्टि भारतीयानां जीवनधारास्रोतः निरन्तरम् इदानीं पर्यन्तं प्रवहदस्ति। ब्रह्मसदृशोऽयं वेदः भारतीयानामाध्यात्मिकजीवनस्य तथा च तस्य सांस्कृतिकविकासस्याध्ययनार्थं कोशग्रन्थो विद्यते। वेदानामध्ययनेन अर्थज्ञानरसास्वादनं विना जीवनं व्यर्थमस्ति। न केवलं वेदाः मानवकल्याणार्थं समाद्रिताः परञ्च मनुना इमे पितृदेवमनुष्याणां सनातनचक्षूरूपेणाभिहिताः।

**पितृदेवमनुष्याणां वेदश्चक्षुः सनातनम्।**[4]

अतः कथयितुं शक्यते यत् अर्थसत्तात्मकस्य वेदस्योपादेयता न केवलं भारते, अपितु जगत्यपि श्रुतास्ति। सर्वत्र ज्ञान–विज्ञानाध्यात्मसन्दर्भे वेदानां प्रासङ्गिकता सार्वभौमिकी सार्वकालिकी चीस्ति। शब्दार्थमयोऽयं वेदः पद्य–गद्यगानकारणात् चतुर्षु वेदेषु ऋग्यजुःसामाथर्वनाम्ना ख्यातः। ब्राह्मणारण्यकोपनिषद्ग्रन्थान् सन्धाय षडङ्गो वेदः च धर्ममयः निष्कारणः अध्ययनवता अध्येयो ज्ञेयश्च, उक्तं यथा–

**ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च।**[5]

आद्याः ऋषयः साक्षात्कृतधर्माण आसन्। तदनन्तरं शनैः शनैः मन्त्रार्थज्ञानात्मक–उपदेशग्रहणे शैथिल्ये समागते वेदव्याख्याग्रन्थानां वेदाङ्गानां च रचना जाता।[6] पुनश्च वेदानाम् अर्थसन्देहचिन्ताकुलैः शब्दराशिः एव वेदाः इति मत्वा अनर्थका हि मन्त्राः[7] अर्थात् वेदानाम् अदृष्टफलपुण्यावाप्तिः अर्थं विनैव उच्चारणश्रवणमात्रेण इति सिद्धान्तितम् । तन्न सच्च ।[8]

वेदार्थनिश्चये व्याकरणस्य प्रयोजनम् द्विप्रकारकम् प्रथमन्तु पदानां प्रकृतिप्रत्ययज्ञानादिद्वारा यौगिकप्रक्रियायाः ज्ञानम् कृत्वा अर्थनिर्धारणम् द्वितीयञ्च उदात्तादिस्वरेण शब्दस्वरूपनिश्चयपूर्वकम् अर्थनिर्धारणम् । वेदा ज्ञानस्वरूपाः मन्त्रराशिभूताः अतः मन्त्रार्थज्ञानम् एव वेदत्वम् । तच्च व्याकरणतः निस्सन्देहता[9] प्राप्नोति। यथा उक्तं निरुक्ते यत् एतत् वेदज्ञानं व्याकरणरहिताय न उपयोगि ।

**ना वैयाकरणाय नानुपसन्नाय अनिदंविदे वा ।**
**नित्यं ह्यविज्ञातुर्विज्ञाने असूया ।।**[10]

---

* प्राध्यापकः, श्रीशक्ति–संस्कृत–महाविद्यालयः, श्रीनयनादेवी जी, बिलासपुर, हि० प्र०

मृदुता, स्निग्धता, कण्ठविकारस्योरुता महत्ता।[24] उदात्तानुदात्तस्वरसमाहारो योऽच् स स्वरितसञ्ज्ञो भवति। सामर्थ्याच्चात्र लोकवेदयोः प्रसिद्धौ गुणावेव वर्णधर्मावुदात्तानुदात्तौ गृह्येते, नाचौ। तौ सन्निहितौ यस्मिन्नचि तस्य स्वरितः इत्येषा सञ्ज्ञा विधीयते।[25] निरुक्तकारो यास्कोऽपि तीव्रार्थतरमुदात्तम्। अनुदात्तमन्वादेशे। उदात्तं प्रथमोपदेशे। अल्पीयोऽर्थतरमनुदात्तम्।[26] इत्यादिषु स्थलेषूदात्तादीन् स्वरान् परिभाषयति।

स्वरेण अर्थनिर्धारण भवति।

- महाभाष्येप्रसिद्धमेव – स्थूलपृषती इत्यत्र स्थूला पृषतयः अथवा स्थूला चासौ पृषतीयुक्ता इति अर्थद्वयमपि सम्भवति । तत्र स्वरेण एव अर्थनिर्धारणम् भवति ।[27]
- कर्त्ता इति पदस्य आख्यातप्रातिपदिकयौगिकतया द्विविध आख्यातम् –कृधातो लुटि। प्रातिपदिकम् च । आख्यातम् अन्तोदात्तम्[28] । प्रातिपदिकम् च अन्तोदात्तम् आद्युदात्त चापि । कृधातोः कृदन्त–तृच्प्रत्ययान्त[28] चित्वात् अन्तोदात्त[29] कर्त्ता इति पदम् तथा च कृधातो कृदन्त–तृन्प्रत्ययान्ते[29] नित्वात् आद्युदात्त[30] कर्त्ता इति पदम् ।तत्र च कृदन्तोऽपि तृच् तृन्प्रत्ययान्तत्वात् अर्थद्वय १. तृचिप्रत्यये केवल प्रत्ययार्थरूपेण कर्तृत्व तथा च तृनि प्रत्यये धातोः अर्थे साधुकारित्वम् इति । अत्र यौगिकज्ञानानन्तर मन्त्रे स्वरेण एव अर्थनिर्धारणम्– यदि प्रातिपदिकम् अन्तोदात्त चेत् तृच्प्रत्ययार्थ सामान्य कर्तृत्व[33]यदि च आद्युदात्त तृच्प्रत्ययार्थः धातोः अर्थे साधुकारित्वम्।[34]
- भ्रातृव्यशब्दोऽपि द्विविधार्थः भ्रातृपुत्रे, शत्रुवाचके च । अत्रापि महर्षिपाणिनि व्यत्यन् प्रत्ययद्वारा[35] पृथक्–पृथक् स्वरनिर्देशनेन वेदमन्त्रे अर्थनिर्धारणोपाय सूत्रयति । व्यत्प्रत्ययान्त भ्रातृव्यशब्द स्वरितान्त[36] भ्रातृपुत्रार्थे तथा च व्यन्प्रत्यायान्तः भ्रातृ
- व्यशब्द आद्युदात्त[37] शत्रु–अर्थे भवति ।
- ऋग्वेदे वृत्रासुरसङ्ग्रामः[38] इतिहास इव दृश्यते किन्तु यौगिकप्रक्रियाया सूर्यमेघवर्णनम् इति निरुक्तकार[39] निर्भ्रान्तता जनयति ।
- एवमेव–
- यः **कृष्णगर्भा निरहन्।**[40] इन्द्रकृष्णस्य गर्भवती स्त्रिय हतवान् इति यौगिकप्रक्रियाया विना अर्थ किन्तु यौगिकार्थेन "कृष्णाविलिखिता रेखा विद्यादयो गर्भा यैः ते" इति महर्षिदयानन्द विवृणोति ।[41]
- कस्ते मातर विधवामचक्रत[42] । इन्द्र स्वमातर विधवाम् अकार्षीत् इत्यादय आरोपा अपास्ता[43] भवन्ति ।
- विचित्रार्थेऽपि यौगिकतया एव विशिष्टार्थज्ञानम् भवति।
- अश्वा भवथ वाजिनो गावो भवथ वाजिनी[44]– सरलार्थः विचित्रः– अश्वा अश्वा भवन्तु गावः अपि अश्वा भवन्तु। किन्तु यौगिकार्थे वाजीशब्दः बलवाची वेगवाची च तेन विशिष्टार्थः उत्पन्नः – अश्वा वेगवन्तः भवन्तु, गाव च बलयुक्ता भवन्तु।[45]
- वत्स गावो न धेनव[46]– अत्र मन्त्रे गौ धेनु च शब्दौ समानार्थवाचिनौ दृश्येते यौगिकार्थे विशिष्टार्थः– यस्या दुग्ध पीयते सा धेनुः धेट् पाने[47]इति धात्वर्थत्वात्।
- भानुना स सूर्येण[48]– अत्र मन्त्रे भानु सूर्य च शब्दौ समानार्थवाचिनौ दृश्येते यौगिकार्थे विशिष्टार्थः– भानुशब्दार्थ प्रदीप्त प्रभायुक्त, भा दीप्तौ[49] धात्वर्थत्वात्।

पुनरपि यौगिकवादे सर्वथा स्वातन्त्र्यं न भवितुमर्हति। यस्य कस्यापि धातु–प्रत्ययद्वारा इच्छितार्थो अर्थ न कर्तुं शक्यते ।